Assignment No-1 कुल अङ्क -10

एम० ए० (द्वितीय वर्ष) संस्कृत

पालिप्राकृतयोः भाषा साहित्यं च

(षष्ठपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. पालिभाषायाः उद्भवः विकासश्च विवेचनीयः।

2. प्राकृतभाषायाः वैशिष्ट्यं लिखत।

3. 'मुनि' अथवा 'भिक्खु' शब्दस्य रूपाणि लिखत (पालिव्याकरणम्)

4. 'गम्' अथवा 'दा' धातोश्च रूपाणि लट् लकारे लिखत। (पालिव्याकरणम्)

5. 'लता' अथवा 'धेनु' शब्दस्य रूपाणि तथा च 'पुच्छ' अथवा 'अस' धातोः (लट् लकारे) लिखत।

6. श्लोक द्वयं सप्रसङ्ग व्याख्येयम् :-

(क) दिसो दिसं यं तं कयिरा वेरी वा पन वेरिनं।
मिच्छापणिहितं चित्तं पापियो नं ततो करे॥

अथवा

न हि वेरेन वेरानि सम्मन्तीधे कुदाचनं।
अवेरेन च सम्मन्ति एस धम्मो सनन्तनो।

(ख) बालाण गुरू तरुणाण तह सही गयवयाण तणओव्व।
इय-सुचरिएहि णिच्चं जेण जणो पालिओ सव्वो॥

अथवा

इसीसि-चुम्बिआइं भमरेहिं सुउमार-केसर-सिहाइं।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइ॥

7. पालिभाषायां समासस्य स्वरूपं प्रतिपादयत।

8. प्राकृतभाषायाः कारकविधिं विशदयत।

Arpit शर्मा

Assignment No - 2 कुल अंक - 10

एम० ए० (द्वितीय वर्ष) संस्कृत

पालिप्राकृतयोः भाषा साहित्यं च

(षष्ठपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. गद्यांशद्वयं प्रसंगपुरस्सरं संस्कृतमाध्यमेन व्याख्येयम्।

(क) इदं खो पन भिक्खवे दुक्खनिरोधगामिनी पटिपदा अरियसच्चं अयमेव अरियो अट्ठंगिको मग्गो सेय्यथीदं सम्मादिट्ठि सम्मासमाधि।

अथवा

राजा सच्चं एसा वदतीति तुट्ठचित्तो तयोऽपि जने बन्धनागारतो आनेत्वा अदासि। सा तयोऽपि ते गहेत्वा गता। सत्थाऽपि न भिक्खवे इदानेव पुब्बेऽपेसा इमे तयो जने दुक्खा मोचेसि येवाति इमं धम्मदेसनं आहरित्वा अनुसन्धिं घटेत्वा जातकं समोधानेसि अतीते चत्तारो एतरहि चत्तारो व राजा पन अहं तेन समयेनाति।

(ख) तओ दोमुहेण निच्छयं नाऊण दिन्ना। सोहण-दिण-मुहुत्ते कयं पाणिग्गहणं। कइवय दिणेहिं धारिओ, पुरऊण विसज्जिओ, गओ उज्जेणिं पज्जोओ।

अथवा

ही माणहे, हदो म्हि, एदस्स मिअआ-सीलस्स रण्णो, वअस्सभावेण निव्विण्णो। 'अअं मओ, अअं वराहो' त्ति मज्झन्दिणे वि गिम्हे विरल-पादव-च्छाआसु वण-राईसु आहिण्डिअ, पत्त-संकर कसाअ-विरसाइं उण्ह-कडुआइं पिज्जन्ति गिरिणई-सलिलाइं।

2. भारतीय-आर्यभाषाणां विकासक्रमे पालिभाषायाः अवदानम् विवेचनीयम्।

3. प्राकृतभाषायाः उद्भवः विकासश्च विवेचनीयः।

4. 'अग्नि' अथवा 'राया' शब्दस्य रूपाणि लिखत।

5. 'ठा' अथवा 'दिस्स' धातोश्च रूपाणि लृट् लकारे लिखत।

6. 'गुरु' अथवा 'अप्पा' शब्दस्य रूपाणि लिखत।

7. 'ठस्' अथवा 'हो' धातोश्च रूपाणि लृट् लकारे लिखत।

8. पालिभाषायाः कारकविधिं विशदयत।

Arpita शर्मा

Assignment No-1 कुल अङ्क - 10

एम० ए० (द्वितीय वर्ष) संस्कृत

नाट्यसाहित्यम् नाट्यशास्त्रं च

(सप्तमपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. एकं श्लोकं प्रसङ्गपुरस्सरं संस्कृत माध्यमेन व्याख्येयम् :

(क) गुणेषु यत्नः पुरुषेण कार्यो न किञ्चिदप्राप्यतमं गुणानाम्।
गुणप्रकर्षादुडुपेन शम्भोरलंघ्यमुल्लङ्घितमुत्तमाङ्गम् ॥

अथवा

(ख) कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति।
शंकनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता ॥

2. श्लोकमेकं प्रसङ्गपूर्वकं व्याख्येयम् :

(क) समारूढा प्रीतिः प्रणयबहुमानादनुदिनं व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति॥

अथवा

(ख) इह प्रथमं मधुमासो जनस्य हृदयानि करोति मृदुलानि।
पश्चाद् विध्यति कामो लब्धप्रसरैः कुसुमबाणैः ॥

3. चारुदत्तस्य चरित्र-चित्रणं करणीयम्।

4. रत्नावलीनाटिकायाः वैशिष्ट्यं वर्णनीयम्।

5. कारिकाद्वयं सप्रसङ्गं व्याख्येयम् :

(क) वस्तुनेतारसस्तेषां भेदकः वस्तु च द्विधा।
तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः।

(ख) अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।
आरम्भयत्नप्राप्त्याशानियताप्ति फलागमः ॥

6. दशरूपकस्य वैशिष्ट्यं वर्णनीयम्।

7. टिप्पणद्वयं लेखनीयम् :

(क) भरतः (ख) धनञ्जयः (ग) विश्वनाथः।

8. टिप्पणद्वयं देयम् :

(क) नाटकम् (ख) प्रकरणं (ग) व्यायोगः।

Ankit शर्मा

Assignment - 2 कुल अंक - 16

एम० ए० (द्वितीय वर्ष) संस्कृत

नाट्यसाहित्यम् नाट्यशास्त्रं च

(सप्तमपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. श्लोकमेकं प्रसङ्गपुरस्सरं संस्कृतमाध्यमेन व्याख्येयम् :

(क) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥

अथवा

(ख) स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः।
पुरुषाणान्तु पाण्डित्यं शास्त्रैरेवोपदिश्यते॥

2. मृच्छकटिकस्य काव्यसौन्दर्यं विवेचनीयम्।

3. एकं श्लोकं प्रसङ्गपूर्वकं व्याख्येयम् :

(क) उदयतटान्तरितमियं प्राची सूचयति दिङ् निशानाथम्।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी॥

अथवा

(ख) प्राणाः परित्यजत काममदक्षिणं मां रे दक्षिणा भवत मद्वचनं कुरुध्वम्।
शीघ्रं न यात यदि तन्मुषिताः स्थ नूनं याता सुदूरमधुना गजगामिनी सा॥

4. उदयनस्य चरित्र-चित्रणं करणीयम्।

5. कारिकाद्वयं सप्रसङ्गं व्याख्येयम् :

(क) बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः,
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः॥

(ख) भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः॥

6. पञ्च सन्धयः निरूपणं कुरुत।

7. टिप्पणद्वयं लेखनीयम् :

(क) सागरनन्दी (ख) शारदातनयः (ग) रूपगोस्वामी

8. टिप्पणद्वयं देयम् :

(क) प्रहसन (ख) स्थायिभावः (ग) ईहामृगः

कुल अङ्क - 10

Assignment No - 1

एम० ए० (द्वितीय वर्ष) संस्कृत

काव्यशास्त्रम् (अष्टमपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए :

1. अधोलिखिता कारिका विस्तरेण व्याख्येया :
'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥'

2. रसदोषाः सोदाहरणं विवेचनीयाः ।

3. मम्मटाचार्य प्रतिपादितं काव्य-लक्षणं समीक्षयत ।

4. अधोलिखिता कारिका विस्तरेण व्याख्येया :
माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश ;

5. केचन चत्वारः अलङ्काराः समाधेयाः :
उपमा, दीपक, निदर्शना, विभावना, श्लेष, अपह्नुतिः ।

6. कारिका विस्तरेण व्याख्येया :
'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।'

7. ध्वन्यालोकप्रथमोद्योतस्य सारं लेखनीयम् ।

8. पदगतदोषाः सोदाहरणं विवेचनीयाः ।

Amit शर्मा

Assignment No-2 कुल अङ्क -10

एम० ए० (द्वितीय वर्ष) संस्कृत

काव्यशास्त्रम् (अष्टमपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. मम्मटाचार्य प्रतिपादितं काव्य-प्रयोजनं सोदाहरणं स्पष्टयत।

2. अधोलिखिता कारिका विस्तरेण व्याख्येया :
'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्यतोऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया'॥

3. काव्यभेदाः सोदाहरणं निरूपयत।

4. कारिका विस्तरेण व्याख्येया :
'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः।
उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥'

5. अधोलिखितेषु केचन चत्वारः अलङ्काराः समाधेयाः :
अनुप्रास, रूपक, वक्रोक्तिः, उत्प्रेक्षा, दृष्टान्त, अर्थान्तरन्यास।

6. 'तस्याभावं जगदुरपरे' इति कथनं सोदाहरणं विशदं व्याख्येयम्।

7. अधोलिखिता कारिका विस्तरेण व्याख्येया :
'तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।
ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः॥

8. 'काव्यस्यात्माध्वनिः' इति कथनं विस्तरेण व्याख्येयम्।

Amit शर्मा

Assignment No-1

# एम० ए० (द्वितीय वर्ष) संस्कृत

## काव्यं काव्यशास्त्रस्य च इतिहासः

## (नवमपत्रम्)

निम्नलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. श्लोकमेकं प्रसङ्गपुरस्सरं व्याख्येयम् :

(क) अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥

अथवा

(ख) ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि! विपद्यते यदि।
तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः॥

2. काव्यसौष्ठवनिर्देशपूर्वकं गद्यांशं प्रसङ्गपुरस्सरं व्याख्येयम् :

'ततः शुचेव मुक्तकण्ठमारटत्सु कृकवाककुलेषु, गृहागिरितरुशिखरेभ्यः पातमत्स्वात्मानं मन्दिरमयूरेषु, परित्यक्तनिजनिवासेषु च वनाय प्रस्थितेषु पत्ररथेषु, सपत्नीभूते ताम्यति तमसि, मन्दीभूतात्मस्नेहेष्वभावमाभिलषत्सु प्रदीपेषु स्फुरदरुणकिरणवल्कलप्रावृतवपुषि प्रव्रज्यामिव प्रतिपन्ने नभसि।'

3. काव्यसौष्ठवनिर्देशपूर्वकं प्रसङ्गपुरस्सरं गद्यव्याख्या कार्या :

'यत्र च गुरुव्यतिक्रमं नक्षत्रराशयः, मात्राकलहं लेखशालिकाः, मित्रोदयद्वेषमुलूकाः अपत्यत्यागं कोकिलाः, बन्धुजीवविघातं ग्रीष्मदिवसाः कुर्वन्ति न जनाः।

4. राजा नलस्य चरित्र-चित्रणं करणीयम्।

5. काव्यशास्त्रे आचार्य आनन्दवर्धनस्य योगदानं प्रतिपादयत।

6. टिप्पणद्वयं लेखनीयम् :

(क) मम्मटः (ख) जगन्नाथः (ग) भामहः।

7. संस्कृतमाध्यमेन कारिकाव्याख्या कार्या :

'नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥'

8. आचार्य दण्डी मते काव्यस्वरूपं प्रतिपादयत।

Ankit Sharma

कुल अङ्क - 10

Assignment No-2

एम॰ए॰ (द्वितीय वर्ष) संस्कृत

काव्यं काव्यशास्त्रस्य च इतिहासः

(नवमपत्रम्)

निम्नलिखित में से किन्हीं पांच प्रश्नो के उत्तर दीजिए।

1. श्लोकमेकं प्रसङ्गपुरस्सरं व्याख्येयम् ÷

(क) "मदेकपुत्रा जननी जराऽऽतुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो! विधे! त्वां करुणा रुणाद्धि नो॥"

अथवा

(ख) 'अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः॥'

2. काव्यसौष्ठवनिर्देशपूर्वकं सप्रसङ्ग व्याख्येयम् ÷
"एकदा तु वासतेय्यास्तुरीये यामे प्रत्युषस्येव स्वप्ने चटुलज्वालापुञ्जपिञ्जरीकृतसकलककुभा दुर्निवारेण दवहुतभुजा दह्यमानं केसरिणमद्राक्षीत्। तस्मिन्नेव दावदहने समुत्सृज्य शावकानुत्प्लुत्य चात्मानं पातयन्तीं सिंहीमपश्यत्।

3. काव्यसौष्ठवनिर्देशपूर्वकं प्रसङ्गपुरस्सरं व्याख्येयम् ÷
"न च मयापि विस्मयाविस्मृतविवेकेन केयं कस्येयं कुत्र कुतो वा प्रस्थितेति प्रश्नाग्रहः कृतः। केवलमदृष्टपूर्वरूपोत्पन्नाकस्मिककौतुकातिरेकास्तमितसमस्तान्यव्यापारेणैकाग्रतया ग्रहनिरुद्धेनेवान्धेनेव मूकेनेव मूर्छितेनेव विषविघूर्णितेनेव स्तोभस्तम्भितेनेव गतायामपि तस्यां तेनाध्वनीनेन सह तत्रैव न्यग्रोधतरुतले सुचिरमासितमासीत्।"

4. नलचम्पूकाव्यस्य महत्वं साधयत।

5. काव्यशास्त्रे अभिनवगुप्तस्य योगदानं वर्णयत।

6. टिप्पणद्वयं लेखनीयम् ÷
(क) विश्वनाथः (ख) वामनः (ग) दण्डी।

7. संस्कृतमाध्यमेन कारिकाव्याख्या करणीयम् ÷
"मिश्राणी नाटकादीनि तेषामन्यत्र विस्तरः।
गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते॥"

8. आचार्य दण्डी मते महाकाव्यस्य लक्षणं समीक्षणीयम्।

Ankit शर्मा

Assignment No-1 कुल अङ्क -10

स्नातकोत्तर द्वितीय वर्ष (संस्कृत)

ऐतिहासिककाव्यम्, खण्डकाव्यम्, आधुनिककाव्यं गीतिकाव्यं च

(दशमपत्रम्)

अधोलिखित में से किन्हीं पाँच प्रश्नों के उत्तर दीजिए।

1. छन्दोऽलङ्कारनिर्देशपूर्वकं सप्रसङ्गं व्याख्येयम् :

कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु।
कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागरुधूपवासः॥

2. काव्यसौष्ठवनिर्देशपूर्वकं सप्रसङ्गं श्लोकव्याख्या करणीया :

सत्पुरुषः खलु हिताचरणैरमन्दमानन्दयत्यखिललोकमनुक्त एव,
आराधितः कथय केन करैरुदारैरिन्दुर्विकाशयति कैरविणीकुलानि॥

3. संस्कृतमाध्यमेन व्याख्यायताम् :

नन्वात्मानं बहुविगणयन्नात्मनैवावलम्बे,
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा,
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥

4. सप्रसङ्गं व्याख्येयम् :

सा कीदृशी नु भविता जननी यदङ्क पुत्राधिरूढ्य शरदिन्दुमुखास्मितेन।
आनन्दसागरनिमज्जितमानसायाः स्तन्यामृतेन परिपोषयितासि गात्रम्॥

5. 'कर्णाभिजात्यम्' नाटकस्यानुसारं कर्णस्य चारित्रं चित्रयत।

6. कर्णाभिजात्यनाटकस्य वैशिष्ट्यं प्रतिपादयत।

7. बलभद्रप्रसादशास्त्रिणः जीवनपरिचयो: देय:।

8. कर्णाभिजात्यम् नाटकस्य रसयोजनां विवेचयत,

Amit शर्मा

Assignment No-2 कुल अङ्क = 10.

स्नातकोत्तर द्वितीय वर्ष (संस्कृत)
ऐतिहासिककाव्यम्, खण्डकाव्यम्, आधुनिककाव्यं
गीतिकाव्यं च (दशमपत्रम्)

निम्नलिखित मे से किन्ही पाँच प्रश्नो के उत्तर दीजिए ।

1. छन्दोऽलङ्कारनिर्देशपूर्वकं सप्रसङ्गं व्याख्येयम् :-

"जिगीषवः केऽपि विजित्य विश्वं विलासदीक्षारसिकाः क्रमेण ।
चक्रुः पदं नागरखण्डचुम्बिपूगद्रुमायां दिशि दक्षिणस्याम्" ॥

2. काव्यसौष्ठवनिर्देशपूर्वकं प्रसङ्गपुरस्सरं व्याख्येयम् :-

"तृष्णालोलविलोचने कलयति प्राचीं चकोरीगणे
मौनं मुञ्चति किञ्च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किन्तु विधौ विधातुमुचितो धाराधराडम्बरः" ॥

3. संस्कृतमाध्यमेन व्याख्येयम् :-

"सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा" ॥

4. प्रसङ्गपुरस्सरं व्याख्येयम् :-

"कीर्तिर्यस्य दिगन्तरालवलयं भित्त्वा बहिः निःसृता
हस्तो यस्य सदैव दानसलिलैः सिक्तः समुन्नीयते ।
शौर्यं यस्य रणे भुजङ्गभुजयोः संगीयते चारणै-
रेषोऽङ्गाधिपतिर्भवान् विजयते राधाहृदयानन्दनः" ॥

5. कर्णाभिजात्यमनुसृत्य कृष्णस्य चारित्रं चित्रयत ।

6. कर्णाभिजात्यमनुसृत्य कुन्त्याः चारित्रं चित्रयत ।

7. कर्णाभिजात्यनाटकस्य प्रासङ्गिकतां निरूपयत ।

8. 'कर्णाभिजात्यम्' नाटकस्य द्वितीयाङ्कस्य सारः लेखनीयम् ।

Amit शर्मा